# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर-डिसेम्बर-२०१६

**कक्षा - शास्त्री -३ (Sem-5)** **गुणाङ्काः - ७०**

**विषयः- स्वामिनारायणवेदान्तः ( J )** **प्रश्नपत्रम्-६** **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - ३०/११/२०१६** **कोड – CC 3.5.10** **सन्दर्भग्रन्थः- छान्दोग्योपनिषद्**

---

**( प्रथमान्वितिः )**

**प्रश्नः -१ अधस्तनमन्त्रेषु मन्त्रद्वयं यथाभाष्यं व्याख्येयम् ।** **०८**

(१) *आपयिता ह वै कामानां भवति ।*
*एतदेव विद्वानक्षरमुद्गीथमुपास्ते ॥*

(२) *देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्धदेव ।*
*उद्गीथमाजह्रुरनेनैतानभिभविष्याम इति ॥*

(३) *ॐ समस्तस्य खलु साम्न उपासनं साधु यत्खलु ।*
*साधु तत्सामेत्याचक्षते यदसाधु तदसामेति ॥*

**प्रश्न-२ कस्यचिदेकस्य प्रश्नस्य सविशदमुत्तरं लिखत ।** **०८**

(१) *प्रणवोपासनस्य फलविशेषं यथाभाष्यं निरूपयत ।*

(२) *पञ्चविधस्य साम्नः उपासनं यथाभाष्यं वर्णयत ।*

**प्रश्न-३ अधोलिखितयोरेकस्योपरि टिप्पणी लेख्याः ।** **०२**

(१) *श्रीगोपालानन्दस्वामी ।*

(२) *छान्दोग्योपनिषद् ।*

**प्रश्न-४ अधोनिर्दिष्टेषु प्रश्नेषु द्वयोः समाधानं विधेयम् ।** **०२**

(१) *छान्दोग्योपनिषदि कत्यध्यायास्सन्ति ?*

(२) *छान्दोग्योपनिषदमनुसृत्य केयं त्रयी विद्या ?*

(३) *उद्गीथे कुशलास्त्रयो बभूवुः के ते त्रयः ?*

(४) *कः कालः संगव उच्यते ?*

**( द्वितीयान्वितिः )**

**प्रश्न-५ अधस्तनमन्त्रेषु मन्त्रद्वयं यथाग्रन्थं व्याख्येयम् ।** **०८**

(१) *मनो हिङ्कारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः*
*प्राणो निधनमेतदायत्रं प्राणेषु प्रोक्तम् ॥*

(२) *ॐ असौ वा आदित्यो देवमधु तस्य द्यौरेव*
*तिरश्चिनवंशोऽन्तरिक्षमपूपो मरीचयः पुत्राः ॥*

(३) *तद्यत् प्रथममृतं तद्वसव उपजीवन्त्यग्निना मुखेन*
*न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृत्यन्ति ॥*

**प्रश्न–६ कस्यचिदेकस्य प्रश्नस्य समाधानं कुरुत । ०८**

(१) *ओंकारेण ब्रह्मोपासनविधिं पाठ्यग्रन्थमनुसृत्य प्रतिपाद्यताम् ।*

(२) *छान्दोग्योपनिषदि प्रतिपादितमधुविद्यां यथाभाष्यं वर्णयत ।*

**प्रश्न–७ अधोलिखितेषु विषयेषु द्वयोरुपरि टिप्पणी कार्या । ०४**

(१) *त्रयी विद्या ।*

(२) *गानविशेषोपदेशः ।*

(३) *त्रयो धर्मस्कन्धाः ।*

(४) *आदित्यशरीरकपरमात्मोपासनम् ।*

**प्रश्न–८ केषाञ्चित् पञ्चानां प्रश्नानामतिलघूत्तराणि प्रेदयानि । ०५**

(१) *छान्दोग्योपनिषदः तृतीयाध्यायस्य प्रथमखण्डे कति मन्त्रास्सन्ति ?*

(२) *वसन्तो हिङ्कारो वा प्रस्तावो वा ?*

(३) *विनर्दः इत्यस्य कः अर्थः ?*

(४) *ब्रह्मसंस्थशब्देन किं निर्दिश्यते ?*

(५) *आकाशः कस्मात् सम्भूतः ?*

(६) *निरुक्तः कस्य गानविशेषोऽस्ति ?*

(७) *छान्दोग्योपनिषदः भाष्यकारः कः ?*

**( तृतीयान्वितिः )**

**प्रश्न–९ अधस्तनप्रश्नेषु द्वयोः समाधानं पाठ्यग्रन्थदिशा विधेयम् । ०८**

(१) *मधुविद्यासम्प्रदायं सविशदं प्रतिपादयत ।*

(२) *पुरुषस्य यज्ञसादृश्यं सविशदं निरूपयत ।*

(३) *गार्हत्याग्निविद्यां वर्णयत ।*

**प्रश्न–१० कस्यचिदेकस्य प्रश्नस्योत्तरं लिखत् । ०८**

(१) *आदित्ये सकलब्रह्मसृष्टिः यथाभाष्यं निरुप्यताम् ।*

(२) *हंसप्रोक्तं ब्रह्मणः तृतीयं पादं यथाभाष्यं वर्णयत ।*

**प्रश्न–११ अधोलिखितेषु प्रश्नेषु द्वावेव समाधेयौ । ०४**

(१) *पुरुषविद्यायाः फलं सविशदमुपपादयत ।*

(२) *रैक्वः राजानं किं प्रत्युवाच ?*

(३) *गौतमः जाबालं किं पृष्टवान् ?*

(४) *अन्तरात्मनः स्वरूपं किम् ?*

**प्रश्न–१२ केषाञ्चित् पञ्चानां प्रश्नानामतिलघूत्तराणि लिखत । ०५**

(१) *ब्रह्मणः चतुर्थः पादः कः ?*

(२) *बहुपाध्यशब्दस्य कोऽर्थः ?*

(३) *सत्यकामस्य मातुर्नामधेयं किमासीत् ?*

(४) *ब्रह्मविद् इत्यस्य कोऽर्थः ?*

(५) *को नाम ब्रह्मपथः ?*

(६) *अर्चिरादिर्मोग वायुप्रभृतयः श्रूयन्ते वा न श्रूयन्ते ?*

(७) *चतुर्थाध्यायस्य सप्तदशे खण्डे कति मन्त्राः सन्ति ?*